International Journal of Sanskrit Research 2019; 5(6): 18-21

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(6): 18-21
© 2019 IJSR
www.anantaajournal.com
Received: 13-09-2019
Accepted: 15-10-2019

**सञ्जीव सरकारः**
शोधछात्रः,
राष्ट्रीयसंस्कृतविद्यापीठम्,
तिरूपतिः, आंध्र प्रदेश, भारत

**Corresponding Author:**
**सञ्जीव सरकारः**
शोधछात्रः,
राष्ट्रीयसंस्कृतविद्यापीठम्,
तिरूपतिः, आंध्र प्रदेश, भारत

# शङ्करभाष्यस्य वैशिष्ट्यं कठोपनिषद्भाष्यशैली च

**सञ्जीव सरकारः**

उपनिषदाम् भाष्यकारैः श्रीमत्शङ्करभगवत्पादाचार्यैः मन्त्रभाष्यरचनाकाले कदापि अन्वयरूपेणविसर्ज्जीकृत्वा मन्त्राणां भाष्यव्याख्या न कृता। यतो उपनिषद् वेदान्तर्गताः, तस्याः पदानां क्रमभङ्गहेतो वेदानां उपौरुषेयत्वं वेदत्वं वा स्खलीभूतम्। यथा ऋग्वेदस्य प्रथमन्त्रस्य प्रथमपदम् – 'अग्निम् इडे पुरोहितम्'। अत्र अर्थबोधार्थं यदि पुरोहितम् अग्निम् इडे - एवमेव व्याख्या कृता तर्हि वेदस्य वेदत्वं विघ्नं भवति। तद्धेतो मन्त्राणां क्रमपरिवर्तनं विना तद्रूपक्रमेण पूर्वाचार्यैः व्याख्याकृता इति प्रसिद्धाऽस्ति। कुत्रचित् दृश्यते अपरव्याख्याकारः मन्त्रपदक्रमानुसारेण व्याख्या न प्रतिपादिता परन्तु सा व्याख्या न सङ्गतिपूर्णा इति विवेचिता। एवमेव कारणाद् श्रीशङ्कराचार्यैः उपनिषदाम् मन्त्रपठितक्रमानुसारं व्याख्या कृता।

कठोपनिषद्भाष्याध्ययनेन अस्माभिः लक्ष्यते यत् – भाष्याभ्यन्तरे स्थूलाक्षरैः शब्दाः मुद्रिताः वर्तन्ते। स्थूलाक्षराणां पदानां प्रथमत अध्ययनेन केवलं सम्पूर्णाः मन्त्राः आप्यन्ते। इयमेव रीति उपनिषदाम् तथा श्रीमद्भगवद्गीतायाम् अनुस्रियते। यतो श्रीमद्भगवद्गीता श्रीभगवतः मुखन्निःसृता वाणी। अतो इच्छानुसारं शब्दविपर्यासोऽनुचितः। गीतायाम् आधिक्येन श्रीभगवतः वचनानि एव प्राप्यन्ते। श्रीभगवतः वाक्यसंसर्गत्वेन अन्येषाम् अपि उक्तयः महत्वं प्राप्नुवन्ति। तस्मात् श्रीशङ्कराचार्यैः श्रीमदभगवद्गीताभाष्ये चापि विपर्यासं अकृत्वा व्याख्या विहिता।

**कठोपनिषद्भाष्यशैलीः-**

भाष्यकाराणां भगवत्पादानां शैली अनितरसाधारणी शोभते। भाष्यारम्भे एव तैः "ॐ नमो भगवते वैवस्वताय मृत्यवे ब्रह्मविद्याचार्याय नचिकेतसे च"[1] इति आरब्धम्। यतो हि अत्र अन्तरार्थः द्विविधो वर्तते। एकस्तु यः साक्षात्कृतपरमानन्दो यावदधिकारं याम्ये पदे वर्तमानोऽकर्तृब्रह्मा त्मतानुभवबलतो भूतयातनानिमित्तदोषैः आलिप्तस्वभाव आचार्यो वरप्रदानेन ब्रह्मविद्याम् उपदिदेश। यस्य तद् द्वारा ब्रह्मविद्या अग्रीह्नीत, नचिकेतः तयोः नमस्कुर्व्वन् एव लिखति। किञ्च भक्तेः विद्याप्राप्त्यङ्गत्वं अपि अनेन सूचीतम् भवति। भक्तिः कस्मिन् इति उक्ते गुरौ ब्रह्मविद्यायाम् अपि।

---

[1] भा.म 4.5.41

एतत तत्त्वद्वयम् अनेन वाक्येन प्रतिपाद्यते इति अद्भुताशैली एतैः प्रतिपादिता। एवमेव तत्र "काठोपनिषदवल्लीनां" इत्यारभ्य "एताः वल्लयः भवन्ति" इति पर्यन्तम् उपदेशार्थः सम्यक्प्रतिपादितः। तत्र कारणम् एतत् एव इति अस्माभिः अनुमातुं शक्यते। "प्राणिनां कामकलुषित चेतसां उपनिषच्छ्रवणात्पराङ्मुखत्वात् विशिष्टस्य अधिकारिणो दुर्निरूपत्वात् बन्धस्य च सत्यस्य कर्मणा एव निवृत्तेः उपनिषजन्यविद्याया निष्प्रयोजनत्वात् जीवस्य असंसारिब्रह्मात्मतायाः प्रतिपादयितुं अशक्यम्। इत्यतः उपनिषच्छब्दस्य अर्थप्रतिपादनद्वारा अधिकार्यादि वर्णनं कृतम्। अतएव उपनिषत् शब्दः प्रथमं प्रतिपादितः इयञ्च विलक्षणाशैली भाष्यात् एव अवगन्तुं शक्या।

भगवान् भाष्यकारः - यमनचिकेतः सम्वादरूपेण प्रवृत्ताः कठवल्लीव्याख्या, तस्याः निर्विघ्नपरिसमाप्त्यर्थं मङ्गलं विदितवान्। मृत्यवे नम इत्यर्थः। यमस्तु मृत्यु नाम्ना प्रसिद्धः स तु सर्वान् मारयति। तेन भूतयातनादि कर्तृत्वम्, तस्य एवञ्च दोषवत्त्वं आपतितम्। आचार्यस्तु निर्दिष्टलोके प्रसिद्धः। तर्हि कथं नमस्कार्यं इति शङ्का उदेति। तद् परिहारार्थं भगवते वैवस्वताय इति प्रयोगः कृतः आचार्यैः। अयम् अर्थः अत्र अन्तगर्भितः।

उत्पत्तिं च विनाशं च भूतानामागतिं गतिम्।
वेत्ति विद्यां अविद्यां च स वाच्यो भगवानिति॥ [2]

यमः करतलीकृत ब्रह्मतत्त्वोऽपि यावदधिकारं याम्ये पदे वर्तमानः प्रारव्धम् अतिवाहयन्नकर्तृब्रह्मात्मताऽनुभवबलतो भूतयातनादिदोषैः आलिप्तस्वभाव इति ज्ञायते। एवञ्च नमो भगवते वैवस्वताय इति वाक्यसारस्वतः अयम् अर्थः लभ्यते। एवञ्च आचार्याणाम् शैली अनितरसाधारणी अत्र ज्ञायते। एवमेव यः ब्रह्मविद्यायाः वोधकः एवमेव प्रचारको अपि तादृशं एव माहात्म्यं भजते। यथा यमः वोधकः नचिकेतः प्रचारकोऽपि भवति। वोधकप्रचारकयोः तुल्ययोगक्षेमत्वं प्रसिद्धम्। उभयत्र मर्यादा समाना। पूज्यतापि समाना। इति नमस्कारत्वम् उभयत्र स्थापितम् आचार्यैः। आचार्याणाम् शैली अस्माभिः वहुत्र एवं द्रष्टुं शक्यते।

आचार्याणाम् प्रतिभाविलासोऽपि अनितरसाधारणः। यतो हि उपनिषच्छब्दविवरणसमये सद् लृ धातोः अर्थत्रयम् वर्णितम्। इदं तु उदाहरणम् – 'ये मुमुक्षवो दृष्दानुश्रविकविषयतृष्णाः सन्तः उपनिषच्छब्दवाच्यां वक्ष्यमाणलक्षणं विद्यामुपसद्योपगम्य तन्निष्ठतया निश्चयेन शीलयन्ति तेषामविद्यादेः संसारबीजस्य विशरणाद्धिंसनाद्विनाशनादित्यनेनार्थयोगेन विद्योपनिषदित्युच्यते। तथा च वक्ष्यति – "निचाय्य तन्मृत्युमुखात्प्रमुच्यते" इति।

पूर्वोक्तविशेषणान्मुमुक्षून्वा परं ब्रह्म गमयतीति ब्रह्मगमयितृत्वेन योगाद्ब्रह्मविद्योपनिषत्। तथा च वक्षति – "ब्रह्म प्राप्तो विरजोऽभूद्विमृत्युः" इति। लोकादिर्ब्रह्मजज्ञो योऽग्निस्तद्विषयाया विद्याया द्वितीयेन वरेण प्रार्थ्यमानायाः स्वर्गलोकफलप्राप्तिहेतुत्वेन गर्भवासजन्मजराद्युपद्रवबृन्दस्य लोकान्तरे पौनः पुण्येन प्रवृत्तस्यावसादयितृत्वेन शैथिल्यापादनेन

धात्वर्थयोगादग्निविद्याऽण्युपनिषदित्युच्यते। तथा च वक्ष्यति – "स्वर्गलोका अमृतत्त्वं भजन्ते इत्यादि। ननु चोपनिषच्छब्देनाध्येतारो ग्रन्थमध्यभिलपन्ति। उपनिषदमधीमहेऽध्यापयाम इति च। नैष दोषोऽविद्यादिसंसारहेतुविशरणादेः सदिधात्वर्थस्य ग्रन्थमात्रेऽसम्भवाद्विद्यायां च सम्भवात्। ग्रन्थस्यापि तादर्थ्येन तच्छब्दत्वोपपत्तेः। "आयुर्वै घृतम्"[3] इत्यादिवत्। तस्माद्विद्यायां मुख्यया वृत्त्योपनिषच्छब्दो वर्तते ग्रन्थे तु भाक्तेति। एव मुपनिषन्निर्वचनेनैव विशिष्ठोऽधिकारी विद्यायामुक्तः। विषयश्च विशिष्ट उक्तो विद्यायाः परं ब्रह्म प्रत्यगात्मभूतम्। प्रयोजनं चास्या उपनिषद आत्यन्तिकी संसारनिवृत्तिब्रह्मप्राप्तिलक्षणा। अनेन व्याख्यानेन व्याकरणविषयाः धर्मशास्त्रविचाराः अपि प्रकाशिताः भवन्ति। एवञ्च सर्वशास्त्रेषु शास्त्रान्तरपरिज्ञानं च सुष्टु निरूपितः अस्ति।

---

[2] क.उ.गो.य.टी.4.21

[3] अ.स.2.56

भाष्ये प्रतिपदार्थनिरूपनशैली तु विलक्षणा दृश्यते। व्याख्याने नचिकेता नाम किल पुत्र आस। वभूव इति लिखन्तास्ते आस इति धातोः अर्थः वभूव इति व्यलिखन्। अनेन ज्ञायते प्रतिपदार्थवर्णनेन एव स्वरोऽपि श्रुत्यर्थः निरूपितो भवति। एवमेव लेखने विनयोऽपि प्रदर्शितः तैः। अतस्ता यथाप्रतिभानं व्याचक्ष्महे व्याख्यानं कुर्महे। यथा प्रतिभानं इति कथनेन औद्धत्यम् परिदृश्यते। पीतोदका जग्धतृणा इति श्रुतिव्याख्यान समये विग्रहवाक्यं अपि प्रदर्शितं तैः। अर्थात् सुललितमार्गेण अर्थाववोध भवतु इति अत्र तात्पर्यम्। तथा च सर्वानुगुण्यं सर्वानुकूल्यं सर्ववैभवश्च तेषां भाष्यस्य शैली भवति। एवम् प्रकरणात् अन्योऽपि विषयः अत्र प्रदर्शते। तेषां शैली निरूपणार्थः।

यद्यपि भार्यापुत्रादीनां सर्वस्वदाने देयत्वेन ग्रहणं नास्ति तेषां यजमानस्वत्वेऽपि सर्वस्वं दद्याद् इति वचनेन धनादिकमेव ग्राह्यं न तु पितृपुत्रादय इति निर्णीतं षष्टाध्याये सप्तमप्रथमाधिकरणे तथापि बालत्वात् पुत्रोऽपि देयः स्वत्वादिति मन्यते। यद्वा जानन्नपि जीर्णगोदानेनोत्पन्नं क्रुतुवैगुण्यं आत्मप्रदानेनापि अपनेष्यामीति मत्वा पृच्छसि पितरं तत कस्मै मां दास्यसीति। अतएव भाष्ये – "मया पुत्रेण सता पितुरनिष्टं फलं निवारणीमात्मप्रदानेनापि क्रतुसम्पत्तिं कृत्वा"..इत्युक्तम्।

नाचिकेतोपाख्यानमानुशासनिकपर्वणि भारतेऽपि श्रूयते। तत्रायं विशेषः। पिता उद्दालकः कदाचित् पुत्रं नदीतीरे स्वेन प्रातर्निक्षिप्तं विस्मृतं च दर्भकलशादिकमानयेत्युक्तवान्, नदीतीरं गत्वा नचिकेताः नदीवेगसमाप्लुतं तत्सर्वमपश्यन् प्रतिनिवृतः दर्भादिकं नदीतीरे न पश्यामीत्यवोचत्, पिता तु कोपेन पुत्रं "यमं पश्ये [4]" ति शशाप। पुत्रस्तु प्रसीदेति ब्रुवन्नेव भूमौ पतितः। पितापि किं मयोक्तमिति दुःखेन भूमौ पतितः। नचिकेताः परदिने सुप्त्वेवोत्थितः स्वस्य पित्राज्ञावशात् यमलोकदर्शनं यमेन सत्कारः पुण्यकृतां लोकानां दर्शनं, दर्शनेनैव पित्राज्ञा निर्वर्तितेति यमेनाभ्यनुज्ञातस्य पुनः पितृसमीपागमनं चोक्त्वा यमोक्तं गोदानफलं च प्रोवाच - इति।

एतदनन्तरं कर्मकाण्डगतो अंशः पुरणीयः। तथाहि – अस्मिन् अवसरे काचित् दृश्यमानशरीरा दैवीवाक् नचिकेतसं समनुजग्राह परतो गन्तुं सहसोत्थितं – हे नचिकेतः तव पिता मृत्यवे त्वां दत्तवान् अस्मि इति उवाच अतः मृत्योः गृहान् गच्छ। परं तु यदा प्रवासी मृत्युः तदा तद्गृहं गच्छ, तत्र च अनाश्वान् तिस्रोरात्रीः वस प्रत्यागत्य मृत्युः यदि पृच्छेत् "किं प्रथमां रात्रिमाश्ना इति। प्रजान्न इति ब्रूयाः। किं द्वितीयामिति पशुंस्ते इति, किं तृतीयामिति साधुकृत्यां त इति"। अत एवोपनिषदि मृत्युर्वरं व्रतीति तिस्रो दास्यन् 'रात्रीर्यदवात्सीर्गृहे मे' इत्यादि।

लोकादिः विराट् पुरुषः तदात्मना उपास्यत्वात् चयनसाध्याग्निरपिलोकादिः इति उक्तम्। या इष्टकाः। नाचिकेतचयनं तैत्तिरीय-ब्राह्मणान्तर्गतकाठद्वितीयप्रश्ने समन्त्रकमुपदिष्टम्। एकविंशति-हिरण्येष्टकाः शर्करा वा आज्ये अभ्यक्ता नाभ्यां उपधीयन्ते चतुरश्रं परिमम्डलं वा कार्यम्।

यत्तु विशिष्टाद्वैतभाष्ये "स्वर्गमग्निं" स्वर्गलोका अमृतत्वं भजन्ते इत्यादै स्वर्गशब्दो मोक्षपर इति समर्थनं तत्र न अद्वैतिनां काचित्क्षतिः कर्मणां चित्तशुद्धिद्वारा परम्परया मोक्षसाधनत्वस्यास्मदिष्टत्वात्। साक्षात् मोक्षसाधनत्वं तु नेष्यते "नास्त्यकृतः कृतेन" इति तन्निषेधात्। तेषामपि मते चयनस्य मोक्षसाधनत्वं ब्रह्मविद्याप्राप्तिद्वारेण इति उक्तत्वात्। अत एव "स्वर्गकामो यजेते" तत्रापि स्वर्गशब्दो मोक्षपर इति विवृण्वन्ति, परन्तु इन्द्राधिष्ठितस्वर्गलोकप्राप्तिसाधनं किमिति प्रश्ने स्वर्गोल्लेखात् इति कथञ्चित् समाधेयम्।

स्वर्गलोके न भयं किञ्चनास्ति इति प्रकृतमन्त्रे श्रूयमाणः स्वर्गशब्दः भोगभूमिपरः "न तत्र त्वं जरया बिभेति" इत्यादीनां त्रिदशानामावास एव प्रसिद्धेः। परे तु नचिकेता अत्यन्तविरक्तः अतः स्वर्गं न अभिलष्येत इति वदन्ति। परन्तु स्वर्गे स्वस्य वैराग्येऽपि जनोपकाराय अग्निविद्यां प्रकाशयितुं यमं प्रार्थयामास इति श्लिष्यते। कर्मकाण्डे नाचिकेताग्निचयन प्रकरणे "स्वर्गं लोकमेति आदित्यस्य सायुज्यं योऽग्निं नाचिकेतं चिनुते" इति वाक्यैः नाचिकेताग्निचयनं रागिणमधिकृत्यैव प्रवृत्तम्। नचिकेतसा तदा यमसमीपे वैराग्याद्यप्रदर्शनात् तत्र स्वर्ग इत्यनेन इन्द्राधिष्ठितलोक एव ग्राह्य इति स्थिते अत्रापि तत एकार्थ्यं शोभनं भाति।

[4] क.उ.4.5.41

अत्र मुख्यतः नचिकेताः शरीरव्यतिरिक्तमेवात्मानं पृच्छति न तु धर्माधर्माद्यतिक्रान्तस्वरूपं, परन्तु तस्य एवं प्रश्ने कृतेऽपि क्रमेण आत्मनः शुद्धस्य स्वरूपं यन्मोक्षसाधनं तद्वक्ष्यति इत्यभिप्रायः।

### सहायकग्रन्थसूची

1. कठोपनिषद्, - स्वामी जुष्टानन्दः, प्र.प्रकाशः2002, कलकाता।
2. काठकोपनिषत् – आनन्दाश्रमसंस्कृतग्रन्थावलिः – विनायक गणेश आप्टे सम्पादितः।
3. दशोपनिषद् – शाङ्करभाष्य – मोतिलालवनार्जीदासः – दिल्ली – 1964.
4. ब्रह्मसूत्रम् - भगवानव्यासः - मो.व. दास. – वाराणसी - 1985.
5. वेदान्तसारः – श्रीसदानन्दः – कालीवरवेदान्तवागीशः – संस्कृतपुस्तकभाण्डारः – कलकाता 1995.
6. शङ्करदर्शनमर्मप्रकाशः - पण्डितप्रवर कृष्णजोयिस् – सम्पादकः – एम्.एल्.एन्,मूर्तिः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, 1996.